# पुराणेषु चैतन्यस्यावधारणा

डॉ. विन्ध्येश्वरीप्रसादमिश्रो 'विनयः'

प्रत्यक्‌चैतन्यरूपाय विश्वरूपायसाक्षिणे ।

नमः श्रीकृष्णचन्द्राय पुराणपुरुषात्मने ॥

पुराणानि, चतुर्दशविद्यासु प्रथमाङ्गत्वेन परिगणितानि[1] इतिहासेनसमं पञ्चमवेदत्वेनसमाम्नातानि[2], भारतीयधर्मदर्शनैतिह्यकलासाहित्यसंस्कृतीनामाकरभूतानि च लोकप्रथितानि ग्रन्थरत्नानीति सुविदितमेव विदितवेदितव्यानां सुरगवीगवेषणै-कव्रतभव्यानाम्। अत्र हि -

सर्गश्चप्रतिसर्गश्च वंशो मन्वन्तराणि च ।

वंशानुचरितश्चैव पुराणं पञ्चलक्षणम् ॥

(मत्स्यपु. ५३/६४)

इति "पञ्चलक्षण्या", क्वचित् -

अत्रसर्गो विसर्गश्च स्थानं पोषणमूतयः ।

मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥

(श्रीमद्भाः २/१०/१)

इत्युक्तदिशा, तथैव -

सर्गोऽस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च ।

वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ॥

(तत्रैव १२/७/९)

इत्युक्तरीत्या च "दशलक्षण्या", ब्रह्माण्डस्य समग्रस्य सृष्टिस्थितिप्रलयात्मिका

व्यावहारिकी व्यवस्था वैशद्येन निरूपिता । अत्र प्रासङ्गिकरूपेण समेषामपि भारतीयानामास्तिकदर्शनानां तत्त्वानि स्वसिद्धान्तरूपेण नास्तिकदर्शनानां मतानि च पूर्वपक्षत्वेन तत्र तत्र कथासु विन्यस्य कक्षीकृतानि । प्रत्येकमपि पुराणं परब्रह्मणः स्वरुपद्वयमवलम्व्य प्रवर्तते, प्रथममधिष्ठानसत्तात्मकमद्वयं गुणातीतं तत्त्वरूपमपरं लीलया धृतविग्रहं ब्रह्मविष्णुशिवदुर्गागणेशसूर्यादिमूर्त्या भक्तानामुपासनालम्बनं सगुणं, जगतः सृष्ट्यादिविधायकं परमेश्वररुपश्चेति । उभयमप्येकरूपमभिन्नमिति पौरणिकानांपद्धतिः । सन्त्यत्राष्टादश- महापुराणानि - ब्रह्म पद्म विष्णुशिवभागवतनारदीयमाकर्ण्डेयाग्नि भविष्य ब्रह्मवैवर्तलिङ्गवरा-हस्कन्दवामनकूर्ममत्स्यगरुडाख्यानि [३] । तत्रापि चतुर्थेशिवपुराणस्थाने क्वचिद् वायुपुराणस्य परिगणनं । पञ्चमे भागवतस्थाने च श्रीमद्भागवत-देवीभागवतयोरेकतमस्य ग्रहणाभिनिवेश इति समुपजातायां विचिकित्सायां कल्पभेदात् संहिताभेदाच्च समाधानमुपपादयन्ति पारम्परीणा इत्यवधेयम् । एतदतिरिक्तान्यष्टादश-संख्याकान्युपपुराणान्यपि पठ्यन्ते - सनत्कुमारनृ-सिंहनारदीय-शिवदुर्वाससांख्य-कापिलमानवौशनसाख्य-वारुणकालिका-साम्बनन्दिप्रोक्तसौरपारा-शरादित्यमाहेश्वर भागवतवासिष्ठसञ्ज्ञकानि[४] । अपिच, पुराणाख्यया केचनान्येऽपि ग्रन्थाः प्रसिद्धास्तेषु महाभारतस्य खिलपर्वरूपं श्रीहरिवंशपुराणमन्यतमं विद्यते, गर्गसंहिता-सदृक्षानि कतिचनान्यान्यपि पौराणीं पद्धतिमनुधावन्ति प्रकरणानीति विदन्त्येव विद्वासः ।

एतेषु वाङ्मयस्यास्य बहुलोंऽशोधर्मशास्त्रीयं व्रततीर्थदेवोपासनादिकमेव भजते, अग्निपुराणाद्यात्मकोऽन्यश्च बहुविधविद्यानांसङ्ग्रहात्मकतामेवाश्रयते, श्रीविष्णुपुराण-श्रीमद्भागवत - प्रभृतिपुराणविग्रहःकश्चनान्यः प्रभागोविशिष्य दार्शनिकीं तात्त्विकतामेवाङ्गीकरोति तथापि समेष्वपि भगवत्तत्त्वस्य सच्चिदानन्दात्मकता तत्र तत्र स्तवनादिप्रसङ्गेषु न न शक्याविष्करणा, सर्वत्र च तत्त्वदृष्ट्या चैतन्यस्यावधारणाऽपि प्रायशः सांख्यदर्शनोक्तरीत्या प्रत्यभिज्ञादर्शनरीत्याऽद्वैतवेदान्तादिपद्धत्या वा समुपलभ्यत एव सर्गादिनिरुपणप्रसङ्गेषु परतत्त्वनिरूपणसन्दर्भेषु च वैशद्यभूमिकामुपनीयमानेति सङ्क्षेपेण निदर्शनपुरस्सर वयमत्र प्रदर्शयामः ।

पुराणेषु चैतन्यस्य स्वरूपम् - सर्वत्रापि पुराणेषु चैतन्यस्य वास्तविकस्वरुपं परसत्तात्मकं परब्रह्म, तत्स्वरूपिणी पराशक्तिर्वेत्यभितम् ।

तच्च कचिद् ज्ञान शब्देन कचिज्ज्योतिरित्याख्यया कापि चिच्छब्देन साक्षात्कचन तु संविदित्यभिधानेन व्यपदिश्यते, यथेमानि विविधपुराणानां वचनानि -

वदन्ति तत्तत्त्वविदस्तत्त्वंयज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥
(श्रीमद्भा. १/२/११)

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितम् ।
सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ॥
(तत्रैव २/६/३९)

*ज्ञानमात्र* परंब्रह्म .....
(तत्रैव ३/३२/२६)

*ज्ञानमेकं* पराचीनैरिन्द्रियै ब्रह्मनिर्गुणम् ।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा ॥
(तत्रैव ३/३२/२८)

अहमेवासमेवाग्रे नान्यत्किंञ्चान्तरं बहिः ।
सञ्ज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥
(तत्रैव ६/४/४७

नमो विज्ञानमात्राय
(तत्रैव ६/१६/१९)

नमो ज्ञानधनाय च
(तत्रैव ८/३/१२)

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ।
(तत्रैव १०/४०/२९)

केवलं ज्ञप्तिमात्रम् (तत्रैव १०/६३/२५)

अवबोधो भवान्बुद्धे.....

(तत्रैव १०/८५/१०)

आसीज्ज्ञानमथोह्यर्थमेकमेवाविकल्पितम् ।

(तत्रैव ११/२४/२)

ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतःस्थितम् ॥

(श्रीविष्णुपुराणम् १/२/६)

यदेतद् दृश्यते मूर्त्तमेतज्ज्ञानात्मनस्तव ।
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥

ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसम्प्लवे ॥

(तत्रैव १/४/३८,४१)

विशुद्धबोधवन्नित्यमजमक्षयमव्ययम् ।
अव्यक्तमविकारं यत्तद्विष्णोः परमं पदम् ॥

(तत्रैव १/९/५१)

ॐ नमो वासुदेवाय शुद्धज्ञानस्वरूपिणे ।

(तत्रैव १/११/५५)

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्म सञ्ज्ञितम् ॥

(तत्रैव ६/७/५३)

स्थूलसूक्ष्मादिभेदेन द्वे रूपे परमात्मनः । ख
ज्ञानरूपं निराकारं निदानं तत्प्रचक्षते ॥

(श्रीमद्देवीभागवतम् ३/७/३९)

ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते तमसःप्लवे ॥
ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत् ।

ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ॥

(पद्मपु. सृष्टिखण्डे ३/४९-५२)

विशुद्धविज्ञानघनं पुराणम्.... ।

(स्कन्दपु. वैष्णवखण्डे २/३३)

एवं ब्रह्ममयं विभाति सकलं विश्वं चरं स्थावरं

विज्ञानाख्यमिदं पदं स भगवान् विष्णुःस्वयंव्यापकः ।

(तत्रैव ब्रह्माण्डखण्डे ३०/८०)

यन्निःसङ्गं चिदाकाशं ज्ञानरूपमसंवृतम् ।

निरीहमचलं शुद्धमगुणं व्यापकं स्मृतम् ॥

(वराहपु. उत्तरार्धे ४२/३५/९८)

नमो विश्वात्मने लोकस्थति व्यापारकारिणे ।

सत्त्वविज्ञानरुपाय पराय प्रत्यगात्मने ॥

(ब्रह्मान्डपु. उपोद्घातपादे ३/२५/२१)

अहं ब्रह्म परं ज्ञानम्....

(तत्रैव ३/३७७/२२)

उपाधिहीनो विमलस्तथैवात्मा प्रकाशते ।

ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः ॥

(कूर्मपु.उत्त. १/२६)

तस्माद्विज्ञानमेवास्ति न प्रपञ्चो न संस्थितिः ।

अज्ञानेनावृतं लोके विज्ञानं तेन मुह्यति ।

तत्रैव, उत्त. १/३९)

विज्ञानं निर्मलं सूक्ष्मं निर्विकल्पं तदव्ययम् ।

(तत्रैव, उत्त. १.४०)

ज्ञानरूपं सदानन्दं प्राहुर्वैमोक्षसाधनम् ।

(नारदपु., पूर्वखण्डे ३३/११)

एकः शुद्धोऽक्षरो नित्यः परमात्मा जगन्मयः ।
नृणां विज्ञानभेदेन भेदवानिव लक्ष्यते ॥
(तत्रैव, उत्तरार्धे ३३/६१)

नमो विज्ञानमात्राय परमानन्दमूर्त्तये ।
(गरूडपु. आचारकाण्डे १९५/२)

अजममरमनन्तं ज्ञानरुपं महान्तम्.... ।
(तत्रैव, आचार. १/१)

एकमासीत्परं ब्रह्म सूक्ष्मं नित्यमतीन्द्रियम् ।
अव्यक्तं ज्ञानरूपेण द्वैतहीनविशेषणम् ॥
(कालिकोपपुराणे १२/७)

इत्येतेषु ज्ञानशब्देन चैतन्यस्यैवाभ्युपगमोऽवगन्तव्यस्तद्यथोक्तं, श्रीशिवपुराणे -

ज्ञानशब्दस्य पर्यायश्चिच्छब्दःस्त्रीत्वमागतः ।
प्रकाशश्चिच्च मिथुनं जगत्कारणतां गतम् ॥
(शिवपु. कैलाससंहिता १६/२७/२८)

इत्यत्र,

प्रज्ञानशब्दश्चैतन्यपर्यायःस्यान्नसंशयः ।
चैतन्यमात्मेति मुने शिवसूत्रं प्रवर्तितम् ॥
चैतन्यमिति विश्वस्य सर्वज्ञानक्रियात्मकम् ।
स्वातन्त्र्यं तत्स्वभावो यः स आत्मा परिकीर्तितः ॥
(तत्रैव, कै. सं. १६/४४-४५)

इत्यत्र च । तथैवास्यज्ज्योतिरिति प्रकाश इति च समाख्यया समाम्नानं, यथा -

प्रत्यग्धामा स्वयञ्ज्योतिः
(श्रीमद्भा. ३/२६/३)

स्वयम्प्रकाशाय नमस्करोमि ।

(तत्रैव, ८/३/१६)

त्वं हि ब्रह्म परं ज्योतिः.... ।

(तत्रैव, १०/६३/३४)

एकं स्वयञ्ज्योतिरनन्तमव्ययम् ।

(तत्रैव, १०/७०/५)

आत्मा ह्येकः स्वयञ्ज्योतिः ..... ।

(तत्रैव, ११/८५/११)

ब्रह्म स्वयञ्ज्योतिरतो विभाति ।

(तत्रैव, ११/२८/२२)

एष स्वयञ्ज्योतिरजोऽप्रमेयो
महानुभूतिः सकलानुभूतिः ॥

(तत्रैव, ११/२८/३५)

प्रधानमव्ययं ज्योतिः.....

(वायुपु., पूर्वार्द्धे २४/३३)

उक्तेभ्यो व्यतिरिक्तोऽयमात्मा सर्वहृदि स्थितः ।
सर्वद्रष्टा च भोक्ता च नक्तमुज्ज्वलदीपवत् ॥

(अग्निपु. ३७७/७)

अहं ब्रह्म परञ्ज्योतिः ।

(तत्रैव, ३७७/१-२२)

परात्परतरं तत्त्वं परं ब्रह्मैकमव्ययम् ।
नित्यानन्दमयं ज्योतिरक्षरं तमसः परम् ॥

(कूर्मपु. १/९४)

अविकारमजं शुद्धं स्वप्रकाशं निरञ्जनम् ।

(नारदपु., पूर्वखण्डे ३३/११)

आनन्दमजरं ब्रह्म परं ज्योतिः सनातनम् ।

परात्परतरं यच्च तद्विष्णोः परमं पदम् ॥

(तत्रैव, पू. ख. ३३/२२)

ज्योतिः समूहं प्रलयेपुराऽऽसीत्केवलं द्विज ।

सूर्यकोटि प्रभं नित्यमसंख्यं विश्वकारणम् ॥

(ब्रह्मवैवर्तपु. ब्रह्मखण्डे २/४)

नमामि सर्वबीजं त्वां ब्रह्मज्योतिः सनातनम् ।

(तत्रैव, ब्र. ख. ४/४)

योगिभिश्चिन्त्यते योऽसौ वेदान्तान्तगचिन्तकैः ।

अन्तरन्तः परंज्योतिस्वरूपं प्रणमामि तम् ॥

(कालिकोपपुराणे १/२२)

प्रकाशकरणज्योतिः स्वरूपान्तरगोचरा ।

त्वमेव जङ्गमस्थेयरूपैका बाह्यगोचरा ॥

(तत्रैव, ५/४९)

सत्त्वोद्रेकप्रकाशेन यज्ज्योतिस्तत्त्वमुत्तमम् ।

स्वप्रकाशं जगद्धाम तत्त्वांशं महेश्वरि ॥

(तत्रैव, ८/१३)

अथ चैतन्यस्य ज्योतीरूपत्वं किन्निमित्तकमिति पर्यनुयोगे समादधाति स एव तत्रभवान् पुराणकारः -

चैतन्यस्य न दृश्यत्वं दृश्यत्वेजडमेव तत् ।

स्वप्रकाशश्च च चैतन्यं न परेणप्रकाशितम् ॥

अनवस्थादोषसत्त्वान्न स्वेनापिप्रकाशितम् ।

कर्मकर्तृविरोधःस्यात्तस्मात्तद्दीपवत्स्वयम् ॥

इति । (श्रीदेवीभागवतम् ७/३२/१२-१३)

अथायमत्र प्रयोगः -

चैतन्यं जडाद्भिन्नम् दृश्यभिन्नत्वात् । यद्यद् जडाद् भिन्नं न भवति तद् तद् दृश्यभिन्नं न भवति यथाघटः, न चेदं चैतन्यं तथा, तस्मान्न तथेति । इत्थं चैतन्यस्य

जड भिन्नत्वसिद्धये तस्य द्रष्टृत्वमवश्यमभ्युपगन्तव्यं, तद्दृष्टृत्वमेवात्र स्वयंज्योतिरित्यादि पदैःसाध्यते । तथा च सांख्यसूत्रमपि -

जडव्यावृतो जडं प्रकाशयति चिद्रूपः

(सां.सू. ६/५०)

यद्येकं चैतन्यं चैतन्यान्तरेण प्रकाश्यत इत्यभ्युपगम्येत तदपि नसत्, तदितरेतरकल्पना-गौरवादनवस्थाप्रसङ्गाद् द्वैतापत्तेश्च, यद्यंश विशेषेण प्रकाशकत्वमंशभेदेन च प्रकाश्यत्वमुपकल्प्येत तदप्यसमञ्जसमेव चैतन्य एकस्मिन् भेदकल्पनाया अप्रामाणिकत्वात्कर्मकर्त्तृ विरोधप्रसक्तेश्चेति प्रकाशकत्वमेवास्य सिद्ध्यति न प्रकाश्यत्वम् ।

किञ्च,

न तत्र सूर्यो भाति न चन्द्रतारकं

नेमा विद्युतो भान्ति कुतोऽयमग्निः ।

तमेव भान्तमनुभाति सर्वं

तस्य भासा सर्वमिदं विभाति ॥

(मुण्डकोपनिषद् २/२/१०)

इति श्रुतिः,

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।

यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥

(श्रीमद्भगवद्गीता १५/६)

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।

यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धिमामकम् ॥

(श्रीमद्भगवद्गीता १५/१२)

इति स्मृतिश्चापि सिद्धान्तमिमं दृढयतः । श्रीमदाद्यशङ्करभगवत्पादा अपि

"यतो यदुपलभ्यते तत्सर्वं ब्रह्मणैव ज्योतिषोपलभ्यते,

ब्रह्म तु नान्येन ज्योतिषोपलभ्यते स्वयं ज्योतिः

स्वरूपत्वात् ... ।"

(ब्रह्मसूत्रे १/३/२२ इत्यत्रशाङ्गरभाष्यम्)

इति चैतन्यापरपर्यायस्य ब्रह्मणः स्वयम्प्रकाशकत्वमद्वैतवेदान्तदृशा समाम्नासिषुः पुराणेष्वपि श्रुतिमूलकस्यास्यैव सिद्धान्तस्य स्वीकाराच्चैतन्यस्य ज्योतीरूपत्वं सुतमां सङ्गच्छते । अथ साक्षाच्चिदिति शब्देन संविदिति शब्देनवा निर्देशो यथा -

एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः ।

(श्रीमद्भा. १/३/३०)

ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः ।
लीलया अपि युज्येरन् निर्गुणस्य गुणाः क्रियाः ॥

(तत्रैव, ३/७/२)

चिन्मात्रमेकमभयम्......

(तत्रैव, ४/७/२६)

अनामरूपश्चिन्मात्रः

(तत्रैव, ६/१६/२१)

तद्ब्रह्म परमं सूक्ष्मं चिन्मात्रं सदनन्तकम् ।

(तत्रैव, १०/८८/१०)

ॐ सर्वचैतन्यरुपां तामाद्यां विद्याश्च
धीमहि । बुद्धिः या नः प्रचोदयात् ।

(श्रीदेवीभा.पु. १/१/१)

चैतन्यं सर्वभूतेषु यत्तद्विद्धि परात्मकम् ।
तेजः सर्वत्रगं नित्यं नानाभावेषु नारद ॥

(तत्रैव ३/७/११)

अहमेवास पुर्वं तु नान्यत्कश्चिन्नगाधिप ।
तदात्मरूपं चित्संवित्परब्रह्मैकनामकम् ॥

(तत्रैव, ७/३२/२)

मनो महान्मतिर्ब्रह्मा पूर्बुद्धिःख्यातिरीश्वरः ।
प्रज्ञा चितिःस्मृतिःसंवित् विपुरं चोच्यते बुधैः ॥

(वायु पु., पूर्वार्द्धे प्रक्रियापादे ६/२५)

दिक्कालाद्यनवच्छिन्नं नित्यम् चिन्मात्रमव्ययम् ।

(वराहपु. उत्तरार्द्धे ४२/२९)

एवं ब्रह्मणि चिन्मात्रे.....

(तत्रैव, उत्त. ४२/५३)

यन्निस्सङ्गं चिदाकाशं ज्ञानरूपमसंवृतम् ।

(तत्रैव, उत्त. ४२/९८)

अहं साक्षी च चिन्मात्रः

(अग्नि पु. ३७७/२०)

आत्मायं केवलः स्वच्छः शुद्धःसूक्ष्मः सनातनः ।
अस्ति सर्वान्तरः साक्षाच्चिन्मात्रस्तमसः परः ॥

(कूर्मपु., उत्तरार्द्धे १/४)

कूटस्थो निर्गुणो व्यापी चैतन्यात्मा स्वभावतः ।

(तत्रैव, उत्तरार्द्धे, १/२७)

नमो भूम्यादिरूपाय नमश्चैतन्यरूपिणे ।

(नारदपु. ४/५९)

चैतन्यमिति विश्वस्य सर्वज्ञान क्रियात्मकम् ।
स्वातन्त्र्यं तत्स्वभावो यः स आत्मा परिकीर्तितः ॥

(शिवपु., कैलास. ६/१६/४५)

वेदाहमेतं पुरुषं चिद्रूपं तमसः परम् ।
सोऽहमस्मीति मोक्षाय नान्यः पन्था विमुक्तये ॥

(गरुडपु., आचारकाण्डे २३६/६)

सर्वात्मकश्च वै यावदात्मचैतन्यरूपकम् ।
शुभमेकाक्षरं विष्णुं सदा ध्यायन् विमुच्यते ॥

(तत्रैव, आचार. २३२/१४)

विशतु हृदयपद्मे सर्वसाक्षी चिदात्मा ।

(तत्रैव, आचार. २३४/६१)

त्वंचितिः परमानन्दा परमात्मस्वरूपिणी ।

(कालिकोपपुराणे ५/१७)

चितिशक्तिं निर्विकारां परमब्रह्मरूपिणीम् ।
प्रणमामि महामायां योगनिद्रां सनातनीम् ॥

(तत्रैव २७/३१)

इत्थं सर्वत्रापि पुराणकदम्बे ब्रह्मस्वरूपमात्मस्वरूपं वा चैतन्यमित्यभिप्रेतं दृश्यते।

नास्तिकास्तिकोभयभेदभिन्नेषु भारतीयदर्शनेषु चैतन्यविषयिव्यवधारणायां ते ते वादिनो मिथो भिद्यन्ते तत्र क्षित्यम्ब्वग्निवाय्वात्मकस्य देहाकारपरिणतस्य भूतचतुष्टयस्य चैतन्यमागन्तुको धर्मः किण्वादिभ्यो मदशक्तिवत्ताम्बूलपूग-चूर्णखदिरादिसं-योगाद्रागोत्पत्तिवद् वेति देहात्मवादिनां चार्वाकाणामभिमतिः । माध्यमिक-योगाचारसौत्रान्तिकवैभाषिकसञ्ज्ञाभिश्चतुःसम्प्रदायिनो बौद्धाः:क्रमेणशून्य-वादविज्ञानवादबाह्यार्थानुमेयवाद बाह्यार्थप्रत्यक्षवादांश्चातिष्ठन्ते, चतुर्णामप्यमीषांमते स्पष्टतरा न चैतन्यावधारणा दृष्टिपथमायाति, कथञ्चिद्विज्ञानवादिनामालय-विज्ञानमेवात्र चैतन्यमिति वक्तुमुचितम् । आर्हतास्तावद् जीवाजीवयोर्भेदकतत्त्वरूपेण चैतन्यमभि प्रयन्ति तत्र बोधाख्यचैतन्यात्मको जीवोऽबोधात्मकस्त्वजीवः - चिदचिद् द्वे परे तत्त्व इति पद्मनन्दिवचनप्रामाण्यात्[५] । अक्षपादीये काणादे च समानतन्त्रे नयद्वये, चैतन्यस्यात्मरूपत्वं नाङ्गीकृतमपि तु ज्ञानाभिन्नत्वेन तद्गुणत्वमेवाम्नातम् । सांख्यास्तत्समान धर्माणो योगाश्च पुरुषस्वरूपत्वेन चैतन्यं स्वीकुर्वाणास्तस्य बुद्धौ प्रतिबिम्बितत्वेन बुद्धिवृत्यनुकरणत्वमापादयन्ति इत्थं बुद्धिपरिणामेन ज्ञानेन साकमत्र चिद्रूपस्यपुरूषस्य पार्थक्यं सुतरामायाति । मीमांसकानां भाट्टप्रघट्टके, सांख्या-दिवदात्मनः स्वरूपेण चैतन्यमभिमतं न दृश्यते, एभि : - 'अहं प्रत्ययेनहिचैतन्यस्वभावस्यात्मनोऽस्तित्वमात्रमवगम्यते[६] भूतेन्द्रियविज्ञाना-नामसञ्ज्ञित्वम् -चैतन्यमन्यस्तु तेभ्यो नित्यश्चेतन[७] आत्माचैतन्यन्याश्रय[८]

इत्यादिभिर्वचनैर्नित्यज्ञानशक्तिमत्वेन रूपेणैवात्मनश्चैतन्यं प्रसाध्यते । अस्मादेव कारणादनुकूलासु स्थितिषु शरीरेन्द्रियविषयेषु सत्स्वात्मन्युत्पन्नं ज्ञानात्मकं चैतन्यमात्मनः स्वभावत्वेन गृहीतुंशक्यते शरीरेन्द्रियाद्यभावरूपायां प्रति-कूलावस्थायां सुषुप्तौ मुक्तौ वा, ज्ञानात्मकस्य चैतन्यस्यास्तित्वं च नाङ्गीक्रियत इति विलक्षणश्चैतेषामयमात्मचैतन्यवाद इति तज्ज्ञा विमृशन्ति[९] । विशिष्टाद्वैत-वादिनश्चिच्छब्देन ईश्वरात्पृथगवस्थितानां जीवानामभिप्रयणमुदीरयन्ति ते चासङ्कुचितापरिच्छिन्ननिर्मलज्ञानरूपा अप्यनादिकर्म-रूपाऽविद्यावेष्टिता अचित्संसर्गेण तदनुगुणसुखदुःखभोक्तारो भगवत्प्रतिपत्तिप्रतिपन्नाश्च तत्पदमुपगन्तारश्च नित्या - द्वासुपर्णेति श्रवणादित्या-करग्रन्थेष्ववगन्तव्यम् । शैवाध्वनि पाशुपतदर्शने च, चैतन्यं दृक्क्रियारूपं मुक्त्यपरपर्यायं शिवपदमित्युच्यते । बद्धो जीवः पशुसञ्ज्ञकः पाशप्रहाणान्ते, "पाशान्ते शिवताश्रुतेः" इति मृगेन्द्राचार्यवचनाच्छिवत्वमुपयाति । सिद्धान्तेऽस्मिन् यद्यपि दृक्क्रियारूपंचैतन्यमात्मनि सर्वदा सर्वतश्च तिष्ठति तथाप्यस्य सर्वतोमुखात्मकः प्रभावो मुक्तावेव प्रकाशतेतराम् । अस्यैव भेदविशेषे प्रत्यभिज्ञादर्शने चैतन्यात्मा महेश्वरः, 'तमेव भान्तमनुभातीति' श्रुत्या प्रकाशचिद्रूपमहिम्ना सर्वस्य भावजातस्य भासकत्वमभ्युपेयते । एवमत्र चैतन्यमेव प्रकाशपदवाच्यं प्रामातृस्वरूपमात्मेत्यवगम्यते तथा चात्र शिवसूत्रं, 'चैतन्यमात्मेति'[१०] । एवमेव, केवलाद्वैतवेदान्तिनांराद्धान्तेऽपि 'सत्यंज्ञानमनन्तंब्रह्म'[११], 'प्रज्ञानं ब्रह्म'[१२], 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यःकृत्स्नो रसधन एवैवं वाऽरेऽयमात्मानन्तरो बाह्यः कृत्स्नः प्रज्ञानघनएव[१३], "साक्षीचेता केवलो निर्गुणश्च[१४]", नित्यो नित्यानां चेतनश्चेतनानाम्[१५] इत्यादिभिः श्रुत्यन्त देशनाभिः चैतन्यमात्मनः स्वरूपमेवेति सङ्क्षेपेण दर्शनवीथीस्वभिमतं चैतन्यस्वरूपसारमावेदितमत्र येन पुराणेषु प्रतिपादितस्यापि चैतन्यस्वरुपस्यावधारणं सुगमं स्यात् ।

यद्यपि विविधेषु पुराणेषु तत्र तत्र प्रसङ्गविशेषे सांख्यादिसमेषामपि दर्शनानामन्वितिः प्रागुक्तरीत्या समुपलभ्यते तथाप्यद्वैतवेदान्तस्य मुख्याचार्यत्वेन, ब्रह्मसूत्ररूपवेदान्तस्य तर्कप्रस्थानप्रणेतृत्वेन च प्रथितस्य तत्रभवतः श्रीकृष्णद्वैपायनव्यासस्यैव पुराणसम्पादकत्वाङ्गीकारात् पुराणेषु वेदान्तसिद्धान्तानां

माहात्म्यं विशेषेण वरीवर्तीत्यत्र चैतन्याभिस्वीकृतिः प्रायस्तमेव पन्थानमनुसरन्ती दृश्यते, तद्यथा श्रीमद्भागवते -

एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः ।
परावराणां परम आस्ते कैवल्यसञ्ज्ञितः ॥
केवलानुभवानन्दसन्दोहो निरूपाधिकः ।
केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकाम् ॥
सङ्क्षोभयन्सृजत्यादौ तया सूत्रमरिन्दम ।
तामाहुस्त्रिगुणव्यक्तिं सृजन्तीं विश्वतोमुखम् ।
यस्मिन् प्रोतमिदं विश्वं येन संसरते पुमान् ।
यथोर्णनाभिर्हृदयादूर्णा सन्तत्य वक्त्रतः ।
तया विहृत्य भूतस्तां ग्रसत्येवं महेश्वरः ॥

श्रीमद्भा. ११/९/१७-२१)

यथा वा, देवीभागवते -

अहमेवास पुर्वं तु नान्यत्किञ्चिन्नगाधिप ।
तदात्मरूपं चित्संवित्परब्रह्मैकनामकम् ॥ इति ।

(७/३२/२)

अत्र चैतन्यस्वरूपस्यात्मनः परब्रह्मणो वाऽद्वैततासुस्पष्टं दर्शिता पुराणर्षिणा । यथा सांख्यदर्शने प्रकृतिर्जडरूपा, तज्जातं निखिलमपि वस्तुजातं जडमिति निरूप्यते तथैवात्रापि -

देहस्त्वचित्पुरुषोऽयं सुपर्णः

(श्रीमद्भा. ११/२३/५५)

दारुवदचिद्देहः (तत्रैव ११/२८/१२)

असत्यं यज्जडं दुःखमवस्त्विति निरूपितम् ।

वाराहपु. उत्तरार्द्ध ४२/३५

देह आत्मा न भवति दृश्यत्वाच्च घटादिवत् ।
प्रसुप्ते मरणे देहादात्माऽन्यो ज्ञायते ध्रुवम् ॥

देहः सचेद् व्यवहरेदविकार्यादिसन्निभः ।

चक्षुरादीनीन्द्रियाणि नात्मा वै करणं त्वतः ।

मनो धीरपि आत्मा न दीपवत्करणं त्वतः ॥

प्राणोऽप्यात्मा न भवति सुषुप्ते चित्प्रभावतः ।

***

अहङ्कारोऽपि नैवात्मा देहवद् व्यभिचारतः ।

उक्तेभ्यो व्यतिरिक्तोऽयमात्मा सर्वहृदिस्थितः ॥

सर्वद्रष्टा च भोक्ता च नक्तमुज्ज्वल दीपवत् ।

(अग्निपु. ३७७/२-७)

इत्येवमादिभिर्वचनैः प्रकृतिर्जडाचिद्भिन्नेति प्रतिपाद्यते किन्त्वेषा प्रातिभासिकी स्थितिः ।

सर्वंखल्विदं ब्रह्मेति[१६] श्रवणात्पारमार्थिकदृष्ट्या तु निरिवलमपि प्रपञ्चजातं चिदात्मन्यध्यस्तं भ्रमात्मकमेव -

तस्माद्विज्ञानमेवास्ति न प्रपञ्चो न संस्थितिः ।

(कूर्मपु. उत्तरार्द्धे १/३९)

एकःशुद्धोऽक्षरो नित्यः परमात्मा जगन्मयः ।

नृणां विज्ञानभेदेन भेदवानिव लक्ष्यते ॥

एक एव परानन्दो निर्गुणः परतः परः ।

भाति विज्ञानभेदेन बहुरूपधरोऽव्ययः ।

(नारद पु. पू.ख. ३३/६१, ६७)

यदि शुद्धाद्वैतादिरीत्या कथञ्चि त्प्रकृतिजातानां पदार्थानां जगतोवासत्यत्वमभ्युपगम्येत तदा तेऽपि

चित्तत्त्वस्यैव स्वरूपभूता, यथोक्तं वायुपुराणे -

मनुते सर्वभूतानां यस्माच्चेष्टाफलं विभुः ।

सौक्ष्मत्वेन विवृद्धानां तेन तन्मनउच्यते ॥

तत्त्वानामग्रतो यस्मान्महांश्च परिणामतः ।

शेषेभ्योऽपि गुणेभ्योऽसौ महानिति ततःस्मृतः ॥

(पूर्वार्द्धे, प्रक्रिया, ६/२६-२७)

त्वमेव जङ्गमस्थेयरूपैका बाह्यगोचरा ।

इति कालिकोपपुराणे च [१७] । एवमेव देवीभागवते, भगवत्या जगज्जनन्याः प्रकृतिरूपत्वेऽपि चैतन्यसमवेतत्वमेवाभिमतं ग्रन्थकारेण -

सांख्या वदन्ति पुरुषं प्रकृतिश्चयां तां
चैतन्यभावरहितां जगतश्चकर्त्रीम् ।
किं तादृशासि कथमत्र जगन्निवास -
श्चैतन्यताविरहितो विहितस्त्वयाद्य ॥

(देवीभा. १/७/२१)

इत्यादौ ।

व्यावहारिकदृष्ट्या तु पुराणकृन्महर्षिः -

भूतेन्द्रियान्तःकरणप्रधानविषयात्मकम् ।
अपरं ब्रह्म निर्दिष्टं परं ब्रह्म चिदात्मकम् ॥

(शिवपु. ७/४/४)

स्थूलसूक्ष्मादि भेदेन द्वेरूपे परमात्मनः ।
ज्ञानरूपं निराकारं निदानं तत्प्रचक्षते ॥

***

तदा भूत विभागे च चैतन्ये च प्रकाशिते ।
चैतन्यस्य प्रवेशाच्च तदाऽहमिति संशयः ।
प्रतीयमाने तेनैव विशेषेणाभिमानतः ॥
आदिनारायणो देवो भगवानिति चोच्यते ।

(देवीभा. ३/७/३९, ४६, ४७)

इत्याद्युक्त्या ब्रह्मणो चिदचिदात्मकंरूपद्वयं समर्थयति । तत्र परमात्मा जीवात्मा

चोभौ चित्कक्षान्तर्गतौ शेषं त्वचित्, चैतन्यप्रकाशेन प्रकाश्यमिति विवेकः। जीवोऽपि चिद्रूपस्य परमात्मन एव कलाविशेषो वनोपहिताऽऽकाशान्तर्गतवृक्षोपहिताकाशवद् यथोक्तं पारमहंस्य संहितायां श्रीमद्भागवत महापुराणे -

अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा ।

(३/२९/२१)

इत्यत्र,

ईश्वरो जीवकलया प्रविष्टो भगवानिति ।

(३/२९/३५)

इत्यत्र च । निर्विशेषं ब्रह्मैव वास्तविकं विशुद्धञ्च चैतन्यं लीलादृष्ट्या स्वात्ममाययाऽसौ प्रकृतिपुरुषात्मकञ्च द्विविधस्वरूपमङ्गीकरोति । चैतन्यात्मना पुरुषरूपेणायं सृष्टेरस्य निमित्तकारणत्वं, प्रकृतिरूपेणचोपादानकारणत्व समवायिकारणत्वं वा स्वस्मिन् दधाति -

चैतन्यस्य समायोगान्निमित्तत्वञ्च कथ्यते ।

प्रपञ्चपरिणामाच्च समवायित्वमुच्यते ॥

(देवीभा. ७/३२/८)

प्राकृतपिण्डरूपजडसमुदायमयमेव, तत्सृष्ट्वा तदेवानु प्राविशदिति[१८] श्रुत्या तदाविश्य चैतन्यमिवावभासयति, यथोक्तं, श्रीमद्भागवते -

कालसञ्ज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः ।

त्रयोविंशतितत्त्वानां गणं युगपदाविशत् ॥

सोऽनुप्रविष्टो भगवान् चेष्टारूपेण तं गणम् ।

(३/६/३)

सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात् ।

तेभ्यो विराजमुद्धृत्य तमनु प्राविशद्विभुः ॥

(३/७/२१)

चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद् यथा ।
विराट् तदैव पुरुषः सलिलादुदतिष्ठत् ॥

(३/२६/७०)

सर्गपर्याये, पुरुषाधिष्ठितप्रकृत्या महत्तत्त्वं ततो वैकारिकस्तैजस[१९] स्तामसश्चेति त्रिविधोऽहङ्कारोजायते, वैकारिकादहङ्कारान्मन इन्द्रियाधिष्ठातृ-देवताश्च भवन्ति, तैजसा - द्दशेन्द्रियाणि, तामसाच्चपञ्च महाभूतान्याविर्भवन्ति।

अत्र यद्यपि मन इत्यादिकं ज्ञानशक्तित्वेन व्यपदिष्टं किन्तु तत्स्वरूपं तु चैतन्यं न भवति तत्र मूलचैतन्यस्यैव तादात्म्याध्यासो ज्ञानेच्छादिरूपेणादर्शप्रति-बिम्बितरविप्रकाशवत्प्रकाशते। आत्मस्वरूपं मुख्यचैतन्यं त्वेतेभ्यः पृथगेव, द्रष्टृरूपत्वात् मन आदीनाञ्च दृश्यपरिसीम्नि समापतितत्वात्, तच्चोक्तं तत्रैव, यथा-

यथा जलस्थ आभासः स्थलत्वेनावदृश्यते ।
स्वाभासेन तथा सूर्यो जलस्थेन दिविस्थितः ॥

(श्रीमद्भा. ३/२७/१२)

यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्यःप्रतीयते ।
अप्यात्मत्वेनाभिमताद् देहादेः पुरूषस्तथा ॥
यथोल्मुकाद्विस्फुलिङ्गाद्धूमाद्वापिस्वसम्भवात् ।
अप्यात्मत्वेनाभिमताद् यथाग्निः पृथगुल्मुकात् ॥

(तत्रैव, ३/२८/४०)

भूतेन्द्रियान्तःकरणात्प्रधानाज्जीवसञ्ज्ञितात् ।
आत्मा तथा पृथग्द्रष्टा भगवान् ब्रह्मसञ्ज्ञितः ॥

(तत्रैव ३/२८/४१)

जीवात्मनो जाग्रत्स्वप्नसुषुप्तिसञ्ज्ञकासुतिसृस्वप्यवस्थासु चैतन्यमनुविद्धमपि ताभ्यः सुतरामतीतं तुरीयत्वेनाभिमतं वेदान्तवादिभिरिव पुराणेष्वपीति तत्र तत्र बहुत्र, शक्यतेऽधिगन्तुं, कानिचन निदर्शनपद्यानि, यथा -

जीवे जाग्रति विश्वाख्यं स्वप्ने यत्तैजसंस्मृतम् ।

सुषुप्ते प्राज्ञसञ्ज्ञं तत्सर्वावस्थासु संस्मृतम् ॥

(वराहपु., उत्तरार्द्धे ४२/३६)

अहं साक्षी च चिन्मात्रो जाग्रत्स्वप्नादिकस्य च

(अग्निपु. ३७७/२०)

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरितिवृत्तयः ।
ता येनैवानुभूयन्ते सोऽध्यक्षःपुरुषः परः ॥

(श्रीमद्भा. ७/७/२५)

जाग्रत्स्वप्नसुषुप्तैश्च विहीनो वैचतुर्थकः ।

(गरुडपु., आचारकाण्डे १५/१४७)

अपिच, यथा पञ्चदश्यां,

शब्दस्पर्शादयो वेद्या वैचित्र्याज्जागरे पृथक् ।
ततो विभक्ता तत्संविदैकरूप्यान्न भिद्यते ॥
तथा स्वप्नेऽत्र वेद्यं तु स्थिरं जागरे स्थिरम् ।
तद्भेदोऽतस्तयोः संविदेकरूपा न भिद्यते ।
सुप्तोत्थितस्य सौषुप्ततमोबोधो भवेत्स्मृतिः ।
सा चावबुद्धविषयाऽवबुद्धं तत्तदा तमः ॥
सबोधो विषयाद्भिन्नो न बोधात्स्वप्नबोधवत् ।
एवं स्थानत्रयेत्येका संवित्तद्वद् दिनान्तरे ॥
मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा ।
नोदेति नास्तमेत्येका संविदेषास्वयम्प्रभा ॥

(पञ्चदशी, तत्त्वविवेकप्रकारणे ३-७)

इत्यवस्थाभेदेष्वपि संविदपरपर्यायस्य चैतन्यस्यभिन्नत्वमेवोपदर्शितं तथैवात्र श्रीदेवीभागवतेऽपि तदेव सिद्धान्तितं, तद्यथा -

जग्रत्स्वप्नसुषुप्त्यादौ दृश्यस्य व्यभिचारतः ।
संविदो व्यभिचारश्च नानुभूतोऽस्ति कर्हिचत् ॥

यदि तस्याप्यनुभवस्तर्ह्ययं येन साक्षिणा ।
अनुभूतः स एवात्र शिष्टः संविद्वपुः पुरा ॥
अत एव च नित्यत्वं प्रोक्तं सच्छास्त्रकोविदैः ।
(७/३२/१५-१७)

इत्थं, यदद्वयं क्षेत्रज्ञरूपं, तदेव चैतन्यमन्यन्मनोबुद्धिचित्ताहङ्काराणाम् यावत्यो विकृतयस्ताश्चैतन्याधिष्ठितत्वात् चैतन्यत्वेन भासमाना अपि जडरूपाक्षेत्रान्तर्भूता एवेति प्रकरणस्यास्य हार्दं, तच्च सुनिपुणमभ्यधायि भगवता भागवतकारेण, तत्र मनोबुद्ध्यादीनां जडप्रकृतिजन्यत्वं, यथा -

वैकारिका[२०]द्विकुर्वाणान्मनस्तत्त्वमजायत ।
यत्सङ्कल्पविकल्पाभ्यां वर्तते कामसम्भवः ॥
तेजसात्तु विकुर्वाणाद् बुद्धितत्त्वमभूत्सति ।
द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः ॥
संशयोऽथ विपर्यासो निश्चयःस्मृतिरेव च ।
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितःपृथक् ॥
(श्रीमद्भा. ३/२६/२७, २९)

आपि च,

सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः ।
दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ॥
एताः संसृतयः पुंसो गुणकर्मनिबन्धनाः ।
(तत्रैव ११/२५/३१-३२)

इति क्षेत्रान्तर्गतानि बुद्ध्यादीनि तत्त्वानि लौकिकजनैश्च चैतन्य-लक्षणत्वेनाङीकृतानि निश्चयादीनि, सङ्कल्पविकल्पादीनि, हर्षशोकभयादीनि कामक्रोधलोभमोहादीनि तद्विकाराणि सर्वाण्यप्यचेतनान्येव, चेतनस्तु क्षेत्रज्ञः प्रत्यगात्मा परमात्मा वेति पुराणकारस्याशयः ।

ननु,

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः ।
इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः ।
एतच्छेत्रं समासेन सविकारमुदाहृतम्[२१]॥

इति भगवदुक्तिप्रामाण्याच्चेतनाया अपि क्षेत्रान्तःपातित्वात्कथं, 'चेतनः प्रत्यागात्मा परमात्मा वेति', भवदुक्तं स्वीकर्तुंशक्नुम इति चेत्कैश्चिदुच्येत तद्ब्रूमः - अत्र शब्दस्यास्य चैतन्यतादात्म्याध्यास एव पूर्वनिरूपिते प्रवृत्तिनिमित्तत्वं, यदाहुः, श्रीमच्छङ्करभगवत्पादाः-

सङ्घातो देहेन्द्रियाणां संहतिः । तस्यामभिव्यक्तान्तःकरणवृत्तिस्तप्त इव लोह पिण्डेऽग्निरात्मचैतन्याभासरसविद्धा चेतना, सा च क्षेत्रं ज्ञेयत्वात् ।[२२]

इत्थमत्र स्वरूपज्ञानव्यञ्जिका प्रमाणासाधारण कारणिका चित्तवृत्तिरेव ज्ञानाख्या[२३] चेतनेति पदेनाख्याता भगवता सा दृश्यत्वात् क्षेत्ररूपिण्येव, एतदेव समर्थयन्नाह शुकोऽपि भगवाञ्छ्रीमद्भागवते -

देहेन्द्रियप्राणमनोधियोऽमी
यदंशविद्धाः प्रचरन्ति कर्मसु ।
नैवान्यदा लोहमिवाप्रतप्तं
स्थानेषु तद्द्रष्ट्रपदेशमेति ॥
(६/१६/२४)

इत्यभियुक्तजनवाचो युक्त्या पुराणमणेश्च समार्थितत्वाद्भगवद्-वचनाविरोधिन्येवास्म त्प्रतिपत्तिः, पर्यन्ते त्विदमेवोक्त्वा विरम्यते, यथा -

पौराणींयं विमला
भगवद्व्यासस्य कीर्त्तिकल्याणी -
वाणी, बिभर्ति स्वस्मिन्

तत्सिद्धान्तस्य[२४] सारसर्वस्वम् ॥

अत्र प्रकरणमाप्तं

यच्चैतन्यस्य चित्रणं चारु ।

उपनिषदां गीताया -

स्तदभिमतं ब्रह्मसूत्रकस्यापि ॥

इति दिक् ।

१. पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
(याज्ञवल्क्यस्मृतिः १/३)

२. ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः ।
(छान्दोग्योपनिषद् ७/२/१)

३. ब्राह्मंपाद्मं वैष्णवञ्च शैवं भागवतं तथा ।
तथान्यं नारदीयञ्च मार्कण्डेयञ्च सप्तमम् ॥
आग्नेयमष्टमञ्चैव भविष्यन्नवमं स्मृतम् ।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं स्मृतम् ॥
वाराहं द्वादशञ्चैव स्कान्दञ्चात्र त्रयोदशम् ।
चतुर्दशं वामनञ्च कौर्मं पञ्चदशं तथा ॥
मात्स्यञ्च गारुडञ्चैव ब्रह्माण्डञ्च ततः परम् ।
महापुराणान्येतानि ह्यष्टादश महामुने ॥
(श्रीविष्णुपु. ३/६/२१-२४)

४. तथैवोपपुराणानि श्रृण्वन्तु ऋषिसत्तमाः ।
सनत्कुमारं प्रथमं नारसिंह ततः परम् ॥
नारदीयं शिवञ्चैव दौर्वाससमनुत्तमम् ।
कापिलं मानवञ्चैव तथा चौशनसंस्मृतम् ॥
वारुणं कालिकाख्यञ्च साम्बं नन्दिकृतं शुभम् ।
सौरं पाराशरं प्रोक्तमादित्यञ्चातिविस्तरम् ॥
माहेश्वरं भागवतं वासिष्ठञ्च सविस्तरम् ।

एतान्युपपुराणानि कथितानि महात्मभिः ॥

(श्री देवीभागवतम् १/३/१३-१६)

५. द्रष्टव्यं, 'सर्वदर्शनसङ्ग्रहे' 'आर्हतदर्शनम्' इति प्रकरणम् ।

६. अजितोपेतं 'तन्त्रवार्तिकम्' पृ.स. ६३, गङ्गनाथ झाकेन्द्रीयसंस्कृत-विद्यापीठप्रयाग इत्यनेन प्रकाशितम् (१९६०)

७. श्लोकवार्तिकस्य न्यायरत्नाकराख्यटीकायाम् द. 'श्लोकवार्तिकम्' पृ.सं. ५१४, पङ्क्तिः २७, तारापब्लिकेशंस वाराणसी १९७८

८. मानमेयोदयः पृ.सं. १८३, चौखम्बाविद्याभवन, वाराणसी १९९६

९. द्रष्टव्यमस्मिन्नेव ग्रन्थे प्रकाशितो डॉ. सोमनाथनेने महाभागानां लेख : - 'मीमांसायां चैतन्यावधारणा' इति ।

१०. शिवसूत्रम् १/१

११. तैत्तिरीयोपनिषद् ३/५

१२. ऐतरेयोपनिषद् ५/३, आत्मबोधोपनिषद् १

१३. बृहदाण्यकोपनिषद् ४/५/१३

१४. श्वेताश्वतरोपनिषद् ६/११

१५. तत्रैव ६/१३

१६. छान्दोग्योपनिषदि ३/१४/१

१७. ५/४१

१८. तैत्तिरीयोपनिषदि २/६

१९. वैकारिक इति सात्त्विकस्तैजस इति राजसो बोध्यः

२०. वैकारिकादिति - प्रकृतिजन्यमहत्तत्त्वं तज्जन्यस्त्रिविधोऽहङ्कारः सात्त्विकराजसताम-साख्यस्तस्यान्यतम भेदात्सात्त्विकाहङ्कारादित्यर्थः ।

२१. श्रीमद्भगवद्गीता १३/५-६

२२. श्रीमद्भगवद्गीता १३/६ इत्यत्र शाङ्करभाष्यम्

२३. दष्टव्योऽत्रैव श्रीमधुसूदनसरस्वतीकृता गूढार्थदीपिका (ख्या) व्यारव्या

२४. तत्सिद्धान्तस्य - वेदान्तदर्शनस्य, व्यासस्यैव तत्प्रतिपादकाचार्यरूपेण सुप्र-सिद्धत्वा-दित्याशयः